।। प्रश्नसञ्चयः ।।

# संस्कृतम्

## दशमी कक्ष्या

## (संस्कृतविद्यालयानां कृते)

## QUESTION POOL

## SANSKRIT

X

(ORIENTAL SCHOOLS ONLY)

Government of Kerala
Department of Education
2017

*Prepared by*

**State Council of Educational Research and Training (SCERT)**

Vidyabhavan, Poojappura, Thiruvananthapuram Kerala-695 012.

Website: www.scert.kerala.gov.in

e-mail : scertkerala@gmail.com

*Prepared by:*
State Council of Educational Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12,
Kerala. E-mail:scertkerala@gmail.com

*Type setting by:*
SCERT Computer Lab.

©
Government of Kerala
Education Department
2016

# आमुखम् ।

पठनं प्रवर्तनाधिष्ठितं कर्तुम् अनुयोज्याः सहायकाश्च बहवः प्रश्नाः अस्मिन् पुस्तके प्रदत्ताः। दशम्यां कक्ष्यायां संस्कृतछात्राणां कृते साहाय्यं प्रदातुमुद्दिश्य पुस्तकमिदं सज्जीकृतम्। तदर्थम् अत्र बहुविधाः प्रश्नाः दत्ताः। उत्तरलेखनावसरे के के अंशाः श्रद्धेयाः इत्यपि तत्र तत्र सूचितम्। एतादृशानां प्रश्नानां समाधानार्थं छात्रेभ्यः कक्ष्यासु प्रशिक्षणं दातव्यम्। अनुयोज्यानि पठनप्रवर्तनानि कक्ष्यासु चालनीयानि। नूतनप्रश्नानां निर्माणं कृत्वा तानुपयुज्य परीक्षाम् अभिमुखीकर्तुं छात्रेभ्यः प्रशिक्षणं च देयम्।
प्रश्नसञ्चयमिदं सप्रयोजनं कर्तुं भवदीयानामपि निर्देशान् सादरं प्रार्थये।

भवदीयः,

**डा.जे.प्रसादः**

**निदेशकः**

***राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,***

***केरलम्।***

# विषयानुक्रमणिका


| क्रमसंख्या | विषयः | पुटसंख्या |
|---|---|---|
| १ | एककम् - १ विचित्रम् | ५-१० |
| २ | एककम् २ चित्रम् | ११-१७ |
| ३ | एककम् ३ शास्त्रम् | १८-२२ |
| ५ | मातृकाप्रश्नपत्रम् | २३-३६ |
| ६ | पादवार्षिकप्रश्नपत्रम् | ३७-३९ |
| ७ | अर्धवार्षिकप्रश्नपत्रम् | ४०-४५ |

एककम्

१

# विचित्रम्

**पाठाः**

१. आम्रकूटवर्णना (काव्यम्) ।

२. माहाश्वेताजन्मवृत्तान्तः (गद्यम्) ।

३. अभिषेकालोचना (चम्पू) ।

**पठनाधिगमाः :-**

- आशयं लिखति।
- वृत्तं निर्णयति।
- अलङ्कारान् विवेचयति।
- आस्वादनटिप्पणीं लिखति।
- व्याख्यानं लिखति।

**प्रश्नः - १**

**यथोचितं योजयत ।**

| | | |
|---|---|---|
| क) कविकुलगुरुः | - | वृत्तम् । |
| ख) इन्द्रवज्रा | - | कालिदासः। |
| ग) हेत्वर्थे | - | सप्त। |
| घ) अश्वाः | - | तृतीया। |

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा यथोचितं योजयति।

**चिन्ताशेषयः :-**

✍ आशयग्रहणं विवेचनं च।

**समयः** :- ५ निमेषाः ।

**अङ्काः** :- ४

**मूल्यनिर्णयसूचकः :-**

⏩ उचितयोजनस्य कृते एकः अङ्कः ।

**उत्तरम् :-**

| | | |
|---|---|---|
| क) कविकुलगुरुः | - | कालिदासः । |
| ख) इन्द्रवज्रा | - | वृत्तम् । |
| ग) हेत्वर्थे | - | तृतीया। |
| घ) अश्वाः | - | सप्त। |

**मातृका प्रश्नः:-**

| | | |
|---|---|---|
| क) गद्यपद्यमयं | - | काव्यम् । |
| ख) कादम्बरी | - | मेघदूतम् । |
| ग) सन्देशकाव्यम् | - | चम्पू। |
| घ) शब्दार्थशरीरम् | - | महाश्वेताजन्मवृत्तान्तः। |

**प्रश्नः - २**

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।**

१. मेघसन्देशस्य कर्ता कः?

(कालिदासः, भारविः, दण्डिः)

२.मेघसन्देशकाव्ये ——— वृत्तमेव स्वीकृतम् ।

(मन्दाक्रान्ता, मालिनी, शिखरिणी )

३. कारकाणि कति ?

(षट्, सप्त, अष्ट )

४. **सौन्दर्यमलङ्कारः** इति केन उक्तम्?

(वामनेन , दण्डिना , भामहेन)

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा उचितपदं चिनोति।

**चिन्ताशेषयः :-**

✍ आशयावगमनं, विवेचनं, निर्धारणं च ।

**समयः** :- ५ निमेषाः।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

⏩ उचितस्य उत्तराय एकोऽङ्कः ।

**उत्तरम् :-**

१. कालिदासः ।

२. मन्दाक्रान्ता ।

३. सप्त ।

४. भामहेन।

**मातृकाप्रशनाः :-**

१) कादम्बरी केन विरचितम् ?

(बाणभट्टेन, भासेन, कालिदासेन)

२) चम्पूरामायणस्य कर्ता कः?

(भोजराजः, बाणभट्टः, भासः)

३) उज्जयिन्याः युवराजः कः?

(चन्द्रापीडः, पुण्डरीकः, हंसः )

४) कोसलाधिपः कः ?

(दशरथः, कंसः, शिशुपालः)

**प्रश्नः - ३**

अधोदत्तश्लोकस्य गद्यक्रमं लिखत।

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाकन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारंगास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।।

सूचनाः-

हे मेघ ! —— सारङ्गाः ——— नीपम् ——— दृष्ट्वा ——— कन्दलीश्च ——— जललवमुचः —— सूचयिष्यन्ति।

**पठनाधिगमः** :-

♣ श्लोकं पठित्वा गद्यक्रमं लिखति ।

**चिन्ताशेषयः** :-

✍ आशयावगमनं प्रयोगः च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः** :-

▸▸ सूचनानुसारं उचितरीत्या गद्यक्रमं लिखति चेत् द्वौ अङ्कौ ।

**उत्तरम् :-**

सारङ्गाः अर्धरूढैः केसरैः हरितकपिशं नीपं दृष्ट्वा अनुकच्छम् आविर्भूतप्रथममुकुलाः कन्दलीश्च जग्ध्वा अरण्येषु अधिकसुरभिम् उर्व्याः गन्धम् आघ्राय जललवमुचः ते मार्गम् सूचयिष्यन्ति।

**प्रश्नः - ४**

**अधोदत्तश्लोकस्य आशयं विशदयत।**

त्वय्यायत्तं! कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यस्सीरोत्कषणसुरभिं क्षेत्रमारुह्य मालं
किञ्चित् पश्चात् व्रज लधुगतिर्भूय एवोत्तरेण।।

**पठनाधिगमः :-**

- ♣ श्लोकस्याशयं अवगच्छति ।

**चिन्ताशेषयः :-**

- आशयावगमनं प्रयोगः च ।

**समयः** :- १५ निमेषाः ।

**अङ्कः** :- ५

**मूल्यनिर्णयसूचकः :-**

- सूचनानुसारं उचितरीत्या लिखति चेत् द्वौ अङ्कौ ।
- भाषाशुद्ध्यै एकोऽङ्कः।
- आशयस्पष्टतायै द्वौ अङ्कौ ।

**उत्तरम् :-**

कविकुलगुरुणा कालिदासेन विरचितात् विप्रलम्भश्रृगाररसात्मकात् मेघसन्देशाद् उद्धृतोऽयं श्लोकः। रामगिरीशैलं प्रति विगमोक्तिं कलयतः मेघस्य पुरतः वाल्मीकात् संभूतस्य इन्द्रधनुषः संयोगेन कृष्णात्मकस्य विष्णोः कान्तिः आपद्यते इति यक्षः अभिप्रैति।

तदनु आकाशं प्राप्तवन्तं मेघं दृष्ट्वा भ्रूविलासाननभिज्ञाः ग्रामीणस्त्रियः तेनैव आयत्तं कृषिफलमिति मत्वा तासां प्रीतिस्निग्धैः लोचनैः मुहुः मुहुः पिबन्ति। एवं वीक्ष्यमाणः त्वं सद्यः सीरोत्कर्षणसुरभिं मालं क्षेत्रमारुह्य लघुगतिः भूयः उत्तरेण व्रज। अत्र ग्रामीणस्त्रीणां सारल्यस्वभावं (मुग्धता) तथा क्षेत्रस्य

वर्णनेन तत्रस्थं कृषिभूयस्त्वं च व्यज्यते। तत्र तु मेघः लघुगतिः एव भवेत् । प्रकृतिकवेः कालिदासस्य प्रकृतिप्रणयत्वं कामातुरे तीव्रविरहेऽपि मेघं मन्दं करोति इति परं विशेषः। अत्र स्वभावोक्तिरलङ्कारः। ' स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम् ' इति तल्लक्षणम्।

**मातृकाप्रश्नाः** :-

क) सूचनानुसारं महाश्वेतायाः उत्पत्तिकथां लिखत ।

**सूचनाः** - उज्जयिन्याः युवराजः - अप्सरकुलजाता- यौवनारंम्भः - पुनस्समागमः ।

ख ) सूचनानुसारं रामाभिषेकालोचनाम् अधिकृत्य सूचनानुसारं टिप्पणीं लिखत।

**सूचनाः** - दशरथः - सुमन्त्रप्रमुखान् - बृहस्पति - पौरप्रमुखान् - आमन्त्र्य - नीतिशास्त्रानुसारं राष्ट्रं - मत्सररहिते - श्रीरामे - निक्षिप्य - विश्रमं ।

**प्रश्नः - ५**

उदाहरणानुसारं लिखत।

उदा - चोपस्थितः - च + उपस्थितः ।

चोपभुज्य - —— + —— ।

**पठनाधिगमः** :-

♣ उदाहरणानुसारं पदच्छेदं लिखति ।

**चिन्ताशेषयः** :-

✍ आशयावगमनं प्रयोगः च।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः** :-

⏩ उचितरीत्या पदच्छेदं लिखति चेत् द्वौ अङ्कौ ।

***उत्तरम्*** :-

चोपभुज्य - च + उपभुज्य ।

***मातृकाप्रश्नः*** :-

त्वय्यायत्तम् - —— + —— ।

त्वय्यासन्ने - —— + —— ।

—— - न + उत्थितः ।

—— - न + उपलब्धः ।

एककम्

२

# चित्रम्

**पाठाः**

४. वृत्तपरिचयः ।

५. अलङ्कारः।

**पठनाधिगमाः :-**

- श्लोकान् पठित्वा अलङ्कारान् लक्ष्यलक्षणपूर्वं विवेचयति।
- श्लोकान् पठित्वा अलङ्कारान् निर्णयति।
- वृत्तं निर्णयति।
- समानवृत्तानां श्लोकानां चयनं करोति।

**प्रश्नः - १**

मन्दाक्रान्तावृत्तस्य लक्षणम् उदाहरणं च लिखत ।

**पठनाधिगमः** :-

♣ वृत्तपरिचयं सम्पादयति ।

**चिन्ताशेषिः** :-

✍ प्रयोगः ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः** :-

- गणनिर्णयाय अङ्कद्वयम् ।
- लक्षणलेखनाय अङ्कद्वयम्।

**प्रश्नः - २**

गणनिर्णयं कृत्वा वृत्तं किमिति निरूप्य लक्षणं च लिखत ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये, यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

**पठनाधिगमः** :-

♣ वृत्तपरिचयं सम्पादयति ।

**चिन्ताशेषयः** :-

✍ अवगमनं प्रयोगः च।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

- गणनिर्णयाय अङ्कद्वयम् ।
- लक्षणलेखनाय अङ्कद्वयम् ।

**उत्तरम् :-**

| मगणः | सगणः | जगणः | सगणः | तगणः | तगणः | गुरुः |
|---|---|---|---|---|---|---|
| - - - | U U - | U - U | U U - | - - U | - - U | - |

पातुं न / प्रथमं/ व्यवस्य/ तिजलं/ युष्मास्व/ पीतेषु/ या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये, यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

अस्मिन् पद्ये प्रतिपादं मगण- सगण- जगण- सगण- तगण- तगणाः- गुरुः च यथाक्रमं भवन्ति। द्वादशभिः सप्तभिश्च वर्णैः यतिः। अतः अत्र शार्दूलविक्रीडितं नाम वृत्तम्।

**लक्षणं** - '**सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्**' । इति।

**मातृका प्रश्नः :-**

क) अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति तथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरर्थचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।

ख) अग्रे पश्यामि तेजोनिबिडतरकलायावलीलोभनीयम्
पीयूषाप्लावितोऽहं तदनु तदुदरे दिव्यकैशोरवेषम् ।
तारुण्यारम्भरम्यं परमसुखरसास्वादरोमाञ्चिताङ्गैः-
रावीतं नारदाद्यैर्विलसदुपनिषत्सुन्दरीमण्डलैश्च।।

**प्रश्नः - ३**

## कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

१. अलङ्कारं कति विधम् ?

(द्विविधम्, त्रिविधम्, चतुर्विधम्)

२. अलंक्रियते अनेन इति ——— ।

(अलङ्कारः, वृत्तम्, उपमानम्)

**पठनाधिगमः** :-

♣ आशयं ज्ञात्वा उचितपदं चिनोति।

**चिन्ताशेषयः** :-

✍ आशयावगमनं, विवेचनं, निर्धारणं च ।

**समयः** :- ४ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः** :-

▸▸ उचितस्य उत्तरस्य कृते एकः अङ्कः ।

***उत्तरम्*** :-

१. द्विविधम् ।

२. अलङ्कारः ।

**प्रश्नः - ४**

**अधोदत्तानि श्लोकानि पठित्वा चर्चां कृत्वा तत्रान्तर्गतानां उपमानोपमेयानां पट्टिकां रचयतु।**

१. त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान्।
२. एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते।
३. हनुमानब्धिमतरत् दुष्करं किं महात्मनाम्।

| उपमानम् | उपमेयम् |
|---|---|
| | |

**पठनाधिगमः** :-

♣ अलङ्कारपरिचयं सम्पादयति।

**चिन्ताशेषयः** :-

✍ आशयावगमनं विवेचनं निर्धारणं च ।

**समयः** :- १० निमेषाः।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः** :-

- उचितस्य पट्टिकाकरणस्य कृते पूर्णाङ्कः ।

**प्रश्नः - ५**

**अधोदत्तान् अलङ्कारान् उदाहरणसहितं समर्थयत।**

क) काव्यलिङ्गालङ्कारम् ।

ख) अनुप्रासालङ्कारम् ।

३) दृष्टान्तालङ्कारम् ।

**पठनाधिगमः** :-

- अलङ्कारज्ञानं सम्पादयति ।

**चिन्ताशेषयः** :-

- अपग्रथनम्, प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकौ** :-

- अलङ्कारसमर्थने अङ्कद्वयम् ।
- उदाहरणस्य कृते अङ्कद्वयम् ।

**प्रश्नः - ६**

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।**

१. ——— अम्बुधिरसनगैर्मोभनौ तौगयुग्मम् ?

(स्रग्धरा, मन्दाक्रान्ता, रथोद्धता)

२. सूर्याश्वैर्मसजास्ततः ———— शार्दूलविक्रीडितम् ।

(सगुरवः, लगौ, तौगयुग्मम् )

**पठनाधिगमः** :-

♣ आशयं ज्ञात्वा उचितपदं चिनोति।

**चिन्ताशेषयः** :-

✍ आशयावगमनं, विवेचनं, निर्धारणं च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः** :-

⏩ उचितस्य उत्तरस्य कृते एकः अङ्कः ।

**उत्तरम्** :-

१. मन्दाक्रान्ता ।

२. सगुरवः ।

**प्रश्नः - ७**

**यथोचितं योजयत ।**

| | | |
|---|---|---|
| क) सूर्यः | - | वृत्तम् । |
| ख) शिखरिणी | - | अलङ्कारः। |
| ग) दृष्टान्तः | - | षट्। |
| घ) रसाः | - | द्वादश । |

**पठनाधिगमः** :-

♣ आशयं ज्ञात्वा यथोचितं योजयति।

**चिन्ताशेषयः** :-

✍ आशयग्रहणं, विवेचनं च ।

**समयः** :- ५ निमेषाः ।

**अङ्काः** :- ४

**मूल्यनिर्णयसूचकः** :-

⏩ उचितयोजनस्य कृते एकः अङ्कः ।

**उत्तरम् :-**

क) सूर्यः - द्वादश ।

ख) शिखरिणी - वृत्तम् ।

ग) दृष्टान्तः - अलङ्कारः।

घ) रसाः - षट्।

**प्रश्नः - ७**

**खण्डिकां पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

केरलराज्ये तिरुवनन्तपुरनगरसमीपस्थः कोल्लूर् ग्रामः। तत्र २५-०८-१८५३ दिने जातः विद्याधिराजः। पिता वासुदेवशर्मा नङ्ङम्मा जननी च। अस्य प्राथमिकविद्याभ्यासः श्री रामन्पिल्लमहोदयस्य आशान् पाठशालायां सम्पन्नः। कुशाग्रबुद्धिरयं विद्यार्थिनामध्यापकानाञ्च प्रीतिभाक् जातः। कक्ष्यानेता च आसीत्। अतः चट्टम्पी इति नाम्ना ख्यातिम् अलभत। सः पालक्काट् आलत्तूर् ग्रामे आनन्दाश्रमं स्थापितवान्।

१. चट्टम्पिस्वामी कुत्र जनिमलभत ?

२. तस्य पितरौ कौ ?

३. तस्य प्राथमिकविद्याभ्यासः कुत्रासीत्?

४ आनन्दाश्रमः कुत्र वर्तते ?

**पठनाधिगमः :-**

♣ गद्यांशं पठित्वा आशयम् अवगच्छति।

**चिन्ताशेषयः :-**

✍ अपग्रथनम्, विवेचनं, प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ४

**मूल्यनिर्णयसूचकः :-**

▸▸ समुचितस्य उत्तरस्य कृते एकैकोऽङ्कः ।

*** *** *** ***

एककम्

३

# शास्त्रम्

**पाठः :-**

६. कारकप्रकरणम् ।

**पठनाधिगमाः :-**

- सूत्रस्य वृत्तिं लखति।
- सोदाहरणं सूत्राणां व्याख्यानं लिखति।
- कारकाणि विविच्य वाक्येषु प्रयुङ्क्ते।

**प्रश्नः - १**

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।**

१. अष्टाध्यायी केन विरचितम्?

(पाणिनिः, वररुचिः, पतञ्जलिः)

२.वैयाकरणसिद्धान्तकौमुदी केन विरचितम् ?

(कात्यायनेन, भट्टोजिदीक्षितेन, पाणिनिना)

३. करोति क्रियां निवर्तयति इति ——— ।

(कारकम्, करणम्, कर्म )

**पठनाधिगमः :-**

♣ आशयं ज्ञात्वा उचितपदं चिनोति।

**चिन्ताशेषयः :-**

✍ आशयावगमनं विवेचनं निर्धारणं च ।

**समयः** :- ५ निमेषाः ।

**अङ्कः** :- ३

**मूल्यनिर्णयसूचकः :-**

▸▸ उचितस्य उत्तरस्य कृते एकः अङ्कः ।

**उत्तरम् :-**

१. पाणिनिः ।

२. भट्टोजिदीक्षितेन ।

३. कारकम् ।

**प्रश्नः - २**

**अधोदत्तानि सूत्राणि सोदाहरणं विशदयत।**

१) अधिशीङ्स्थासां कर्म ।    २) कर्तुरीप्सिततमं कर्म।

**पठनाधिगमः :-**

♣ सूत्राणां व्याख्यानं सोदाहरणं लिखति ।

**चिन्ताशेषयः** :-

✍ आशयावगमनं, निर्धारणं प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ८

**मूल्यनिर्णयसूचकाः** :-

- उचितस्य सूत्रसमर्थनाय अङ्कद्वयम् ।
- उचितस्य उदाहरणसमर्थनस्य कृते अङ्कद्वयम् ।

**मातृकाप्रश्नाः** :-

१) रुच्यर्थानां प्रियमाणः । २) षष्ठी शेषे । ३) भीत्रार्थानां भयहेतुः ।

४) सप्तम्यधिकरणे ।

**प्रश्नः - ३**

**अधोदत्तवाक्येषु अधोरेखाङ्कितपदानां प्रयोगसाधुतां सप्रमाणं लिखत।**

१) रामः पयसा ओदनं भुङ्क्ते २) इन्द्रः वज्रेण वृत्रं हन्ति ।

**पठनाधिगमः** :-

♣ कारकं तथा उपपदविभक्तिज्ञानं सम्पादयति ।

**चिन्ताशेषयः** :-

✍ आशयावगमनं निर्धारणं प्रयोगः च ।

**समयः** :- १० निमेषाः ।

**अङ्कः** :- ६

**मूल्यनिर्णयसूचकः** :-

- उचितसूत्रलेखने एकोऽङ्कः ।
- कार्यकारणबन्धसमर्थनाय अङ्कद्वयम् ।

**मातृकाप्रश्नाः** :-

१) धनिकः दरिद्राय क्रुध्यति ।  २) रषीदः ग्रामात् आयाति ।

**प्रश्नः - ४**

**प्रादेशिकभाषया विवर्तयत।**

अस्माकं कृषिसंस्कृतिः प्रसिद्धा एव। कार्षिकवृत्तेः बहवः आचाराः विश्वासाः च उदिताः दृश्यन्ते। जीवितं सम्यक् अवगन्तुं कर्षकवृत्तिना प्रभवति। कर्षकस्य उत्पन्नानाम् उचितं मूल्यम् आवश्यकम्। जनानां कृषिः एकं पवित्रकर्म।

**पठनाधिगमः** :-

- आशयं ज्ञात्वा भाषान्तरीकरणं करोति।

**चिन्ताशेषयः** :-

- आशयावगमनं , अपग्रथनं , प्रयोगं च ।

**समयः** :- १५ निमेषाः ।

**अङ्काः** :- ५

**मूल्यनिर्णयसूचकः** :-

- एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

**प्रश्नः - ५**

**उदाहरणानुसारं वाक्यं परिवर्तयत ।**

उदा - यदा वर्षा आगच्छति तदा छत्रम् उद्घाटयति ।

वर्षायाम् आगते सति छत्रम् उद्घाटयति।

अ) यदा प्रकोष्टे विद्युद्दीपः प्रकाशितः तदा अन्धकारः निर्गतः ।

**पठनाधिगमः** :-

- सतिसप्तमीप्रयोगं प्रत्यभिजानाति।

**चिन्ताशेषयः** :-

- आशयावगमनं प्रयोगः ।

**समयः** :- ३ निमेषाः ।

**अङ्कः** :- २

**मूल्यनिर्णयसूचकः** :-

- उचितरीत्या वाक्यं परिवर्तयति चेत् अङ्कद्वयम् ।

***उत्तरम्*** :-

प्रकोष्टे विद्युद्दीपे प्रकाशिते सति अन्धकारः निर्गतः ।

***मातृकाप्रश्नः*** :-

क) यदा विदेशात् पुत्रः समागतः तदा माता सन्तुष्टा जाता ।

*** *** *** ***

SET -I

**S. S. L .C. EXAMINATION, MARCH - 2017**

**SAMPLE QUESTION PAPER**

**SANSKRIT**

**First Language Part II - Paper -II**

**(For Oriental Sanskrit Schools Only)**

**Time - 1½ Hours** **Total Score - 40**

---

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

1. **यथोचितं योजयत ।** (4x1=4)

| | | |
|---|---|---|
| १) कालिदासः | - | चम्पूरामायणम् । |
| २) बाणभट्टः | - | वैयाकरणसिद्धान्तकौमुदी । |
| ३) भोजराजः | - | मेघदूतम् । |
| ४) भट्टोजिदीक्षितः | - | कादम्बरी । |

2. **कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।** (4x1=4)

१) प्रदत्तेषु गद्यकाव्यं किम् ?
(कादम्बरी, कुमारसम्भवम्, मेघदूतम्)

२) ' यमनसभलाः गः ' कस्य वृत्तस्य लक्षणमिदम् ?
(शिखरिणी, मन्दाक्रान्ता, रथोद्धता)

३) उज्जयिन्याः राजपुत्रः कः ?
(तारापीडः, चन्द्रापीडः, हरिश्चन्द्रः)

४) अधिकरणे........... स्यात् ।
( चतुर्थी, पञ्चमी,सप्तमी )

**3. सतिसप्तमीम् उपयुज्य वाक्यं परिवर्तयत।** (1x2=2)

१) नृत्तं समाप्तम् । सदस्याः करघोषमकुर्वन् ।

4. **गणनिर्णयं कृत्वा समन्वयपूर्वकं वृत्तलक्षणं लिखत।** (1x4=4)

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम् ।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्वं
तत्तावद्भाति साक्षाद् गुरुपवनपुरे हन्त! भाग्यं जनानाम् ।।

5. **रेखाङ्कितानां पदानां विभक्तीनां प्रयोगसाधुतां लिखत।** (3x1=3)

१) सिंहः <u>काननम्</u> अधिवसति ।

२) बालकाः <u>कन्दुकेन</u> क्रीडन्ति ।

३) <u>वृक्षात्</u> फलानि पतन्ति ।

6. **सूचनानुसारं रामाभिषेकालोचनाम् अधिकृत्य स्ववाक्यैः लिखत ।** (1x5=5)

***सूचनाः*** - भोजराजेन विरचितः - रामायणं चम्पू - अयोध्याकाण्डे - रामाभिषेकाय - दशरथः - प्रमुखान् पुरोहितान् - उवाच -लोकस्य मङ्गलं कृत्वा - राष्ट्रपरिपालनं प्राप्तवन्तः - राज्यभारं निक्षिप्य - इच्छामि।

7. **दृष्टान्तालङ्कारस्य लक्षणं सोदाहरणं व्याख्यात।** (1x4=4)

8. **सोदाहरणम् एकं सूत्रं व्याख्यात ।** (1x4=4)

१) ध्रुवमपायेऽपादानम् । २) कर्तुरीप्सिततमं कर्म ।

9. **सूचनानुसारं श्लोकस्य आशयं लिखत ।** (1x3=3)

मम सुरनरगीतख्यातिभिर्हेतिभिर्वा
दिवि भुवि च समानप्रक्रमैर्विक्रमैर्वा।
नियतमपरिहार्या या जरा सा मदङ्गे
विकचकमलषण्डे चन्द्रिकेवाविरासीत् ।।

***सूचनाः*** - देवमानुषाणां- पराक्रमेण च - दूरीकर्तुं - विकसितकमलसमूहे - आविर्बभूव ।

10. **दत्तेभ्यः वाक्येभ्यः उपमानम् उपमेयं च विविच्य लिखत ।** (2x1=2)

१) पद्मसदृशं अच्छोदसरः ।

२) कमलमिव नयनं विभाति।

11. **प्रादेशिकभाषया विवर्तयत ।** (1x5=5)

एकदा महाराजः दुष्यन्तः मृगयाविनोदार्थं वनम् अगच्छत्। तस्मिन् वने एव कण्वमहर्षेः आश्रमम् आसीत्। तत्र कण्वाश्रमे मुनिकन्यकां शकुन्तलां राजा अपश्यत्। कण्वस्य अभावे शकुन्तला अतिथिं स्वीचकार। तस्याः सत्कारं स्वीकृत्य राजा अतीव सन्तुष्टोऽभवत्।

*** *** ***

SET -I

**S. S. L .C. EXAMINATION, MARCH - 2017**
**SAMPLE QUESTION PAPER - ANSWER KEY**
**SANSKRIT**
**First Language Part II - Paper -II**
**(For Oriental Sanskrit Schools Only)**

**Time - 1½ Hours** **Total Score - 40**

---

1. **यथोचितं योजयत ।** (4x1=4)

१) कालिदासः - मेघदूतम् ।
२) बाणभट्टः - कादम्बरी ।
३) भोजराजः - चम्पूरामायणम् ।
४) भट्टोजिदीक्षितः - वैय्याकरणसिद्धान्तकौमुदी ।

2. **कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।** (4x1=4)

१) कादम्बरी ।
२) शिखरिणी ।
३) चन्द्रापीडः ।
४) सप्तमी ।

3. **सतिसप्तमीम् उपयुज्य वाक्यं परिवर्तयत ।** (1x2=2)

१) नृत्ते समाप्ते सति सदस्याः करघोषमकुर्वन् ।

4. **गणनिर्णयं कृत्वा समन्वयपूर्वकं वृत्तलक्षणं लिखत।** (1x4=4)

उचितस्य गणनिर्णयस्य कृते अङ्कद्वयम्। उचितस्य वृत्तलक्षणस्य कृते अङ्कद्वयम् ।

5. **रेखाङ्कितानां पदानां विभक्तीनां प्रयोगसाधुतां लिखत।** (3x1=3)

१) 'कर्मणि द्वितीया' इति सूत्रेण द्वितीयाविभक्तिः।
२) 'कर्तृकरणयोस्तृतीया' इति सूत्रेण तृतीयाविभक्तिः।
३) 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमीविभक्तिः।

6. **सूचनानुसारं रामाभिषेकालोचनाम् अधिकृत्य स्ववाक्यैः लिखत ।** (1x5=5)

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः।

**मूल्यनिर्णयसूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतायै एकोऽङ्कः ।
- भाषाशुद्ध्यै अङ्कद्वयम् ।

7. **दृष्टान्तालङ्कारस्य लक्षणं सोदाहरणं व्याख्यात।** (1x4=4)

उचित लक्षणसमर्थनस्य कृते अङ्कद्वयम् ।

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम्।

8. **सोदाहरणम् एकं सूत्रं व्याख्यात ।** (1x4=4)

उचितलक्षणसमर्थनस्य कृते अङ्कद्वयम् ।

उचितउदाहरणसमर्थनस्य कृते अङ्कद्वयम्।

**9. सूचनानुसारं श्लोकस्य आशयं लिखत ।** (1x3=3)

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णयसूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतायै एकाङ्कः ।

**10. दत्तेभ्यः वाक्येभ्यः उपमानं, उपमेयं च विविच्य लिखत ।** (2x1=2)

उपमानम् - अच्छोदसरः , नयनम्।

उपमेयम् - पद्मम् , कमलम् ।

**11. प्रादेशिकभाषया विवर्तयत।** (1x5=5)

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।

*** *** ***

SET -I

**S. S. L .C. EXAMINATION , MARCH - 2017**

**SAMPLE QUESTION PAPER - BLUE PRINT**

**SANSKRIT**

**First Language Part I Sanskrit- Paper -II**

**(For Oriental Sanskrit Schools Only )**

**BLUE PRINT**

**प्रश्नविशकलनरूपरेखा**

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | विचित्रम् | 2 | 6 | 2 | 8 | 4 | 14 |
| २ | चित्रम् | (1) | 1 | 3 | 10 | 3 | 11 |
| ३ | शास्त्रम् | (1) | 1 | 4 | 14 | 4 | 15 |
| | **आहत्य** | **2** | **8** | **9** | **32** | **11** | **40** |

## WEIGHTAGE TO TYPE OF QUESTIONS

## प्रश्नानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | आङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 9 | 32 | 80% |
| | **आहत्य** | **11** | **40** | **100%** |

## WEIGHTAGE TO UNITS

## एककानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| १ | विचित्रम् | 14 | 35.0% |
| २ | चित्रम् | 11 | 27.5% |
| ३ | शास्त्रम् | 15 | 37.5% |
| **आहत्य** | | **40** | **100%** |

SET -II

**S. S. L .C. EXAMINATION , MARCH - 2017**
**SAMPLE QUESTION PAPER**
**SANSKRIT**
**First Language Part II - Paper -II**
**(For Oriental Sanskrit Schools Only)**

**Time - 1½ Hours** **Total Score - 40**

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

1 .**यथोचितं योजयत ।** (4x 1=4)

१) विष्णुं भजति - आधारोऽधिकरणम् ।

२) सुधाखण्डेन लिखति - अपादाने पञ्चमी ।

३) गृहात् गच्छति - कर्तुरीप्सिततमं कर्म।

४) कटे शेते - कर्तृकरणयोस्तृतीया ।

2. **सोदाहरणम् एकं सूत्रं व्याख्यात।** (1x4=4)

साधकतमं करणम् ।

(अथवा)

चतुर्थी सम्प्रदाने।

3 .**सतिसप्तमीप्रयोगेण वाक्यं परिवर्तयत ।** (1x 2=2)

१) सूर्यः अस्तं गच्छति। अन्धकारः व्याप्नोति।

4. **गणनिर्णयं कृत्वा समन्वयपूर्वकं वृत्तलक्षणं लिखत।** (1x 4=4)

सूर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासिफालान्तरम्
कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम्।
गण्डोद्यन्मकराभकुंडलयुगं कण्ठोज्ज्वलत्कौस्तुभम्
त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीप्रं भजे।।

5. **उदाहरणानुसारं वाक्यं परिवर्तयत ।** (1x 1=1)

उदाः - अहं कथां कथयामि ।

मया कथा कथ्यते ।

१) अहं गीतं पठामि ।

.....................।

6. **सूचनानुसारं महाश्वेतायाः उत्पत्तिकथाम् अधिकृत्य स्ववाक्यैः लिखत ।** (1x 5=5)

***सूचनाः -*** अप्सरकुलजाता - माता गौरी - पिता हंसः - सखीजनेन सह - स्नातुमगच्छत् - मुनिकुमारमपश्यत् ।

7 . **स्रग्धरावृत्तस्य लक्षणं सोदाहरणं व्याख्यात।** (1x 4=4)

8. **पट्टिकां पूरयत ।** (3x 1=3)

| कृतिः | काव्यविभागः | कर्तारः |
|---|---|---|
| १) मेघसन्देशः | ............. | कालिदासः । |
| २) ........... | गद्यकाव्यम् | बाणभट्टः । |
| ३) रामायणं चम्पू | चम्पूकाव्यम् | .......... । |

9. **काव्यलिङ्गालङ्कारस्य लक्षणम् उदाहरणसमन्वयपूर्वकं लिखत ।** (1x 4=4)

10. **अधोदत्तं गद्यांशं पठित्वा सम्भाषणं पूरयत।** (4x 1=4)

अभिषेकालोचनावेलायां दशरथः सुमन्त्रप्रमुखान् अमात्यान् आहूय 'रामे राज्यभारं निक्षेप्तुम् इच्छामि ' इत्यवदत् । एतत् श्रुत्वा सर्वे पौरप्रमुखाः अमात्याः च तत् उचितमिति राजानमवदन् ।

दशरथः - भोः ! अमात्याः! विशिष्टां वार्ताम् एकां निवेदयामि ।

सुमन्त्रः - राजन् ! ........................? निवेदय।

दशरथः - अहं .............. राज्याभिषेकं कर्तुम् इच्छामि। को वा भवताम् अभिप्रायः।

सुमन्त्रः - भवान् ..............राजा अस्ति । तथापि जनाः रामं राजानम् इच्छन्ति ।

दशरथः - .................... तर्हि राज्याभिषेककार्याणि आरभन्ताम् ।

11. **प्रादेशिकभाषया विवर्तयत ।** (1x 5=5)

भारतं कृषिप्रधानं राष्ट्रं भवति। प्राचीनकालादारभ्य जनाः कार्षिकवृत्तिं कुर्वन्ति। कार्षिकवृत्तेः परिपोषणाय अत्यन्तम् उपकुर्वन्ति तत्रस्थाः नद्यः। अनेकाः नद्यः भारते प्रवहन्ति। अतः नदीनां संरक्षणम् अवश्यं कर्तव्यमस्ति।

*** *** ***

SET -II

## S. S. L .C. EXAMINATION , MARCH - 2017

## SAMPLE QUESTION PAPER - ANSWER KEY

## SANSKRIT

### First Language Part II - Paper -II

### (For Oriental Sanskrit Schools Only)

**Time - 1½ Hours** **Total Score - 40**

1 .**यथोचितं योजयत ।** (4x 1=4)

१) विष्णुं भजति - कर्तुरीप्सिततमं कर्म।

२) सुधाखण्डेन लिखति - कर्तृकरणयोस्तृतीया ।

३) गृहात् गच्छति - अपादाने पञ्चमी ।

४) कटे शेते - आधारोऽधिकरणम् ।

2. **सोदाहरणम् एकं सूत्रं व्याख्यात।** (1x4=4)

उचितलक्षणसमर्थनस्य कृते अङ्कद्वयम्।

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम् ।

3 .**सतिसप्तमीप्रयोगेण वाक्यं परिवर्तयत ।** (1x 2=2)

१) सूर्ये अस्तं गते सति अन्धकारः व्याप्नोति।

4. **गणनिर्णयं कृत्वा समन्वयपूर्वकं वृत्तलक्षणं लिखत।** (1x 4=4)

उचितस्य गणनिर्णयस्य कृते अङ्कद्वयम्। उचितस्य वृत्तलक्षणस्य कृते अङ्कद्वयम् ।

5. **उदाहरणानुसारं वाक्यं परिवर्तयत ।** (1x 1=1)

१) मया गीतं पठ्यते ।

6. **सूचनानुसारं महाश्वेतायाः उत्पत्तिकथाम् अधिकृत्य स्ववाक्यैः लिखत ।** (1x 5=5)

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णय सूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतयै एकोऽङ्कः ।
- भाषाशुद्धै अङ्कद्वयम् ।

7 . **स्रग्धरावृत्तस्य लक्षणं सोदाहरणं व्याख्यात।** (1x 4=4)

उचित लक्षणसमर्थनस्य कृते अङ्कद्वयम्।

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम्।

8. **पट्टिकां पूरयत ।** (3x 1=3)

| कृतिः | काव्यविभागः | कर्तारः |
|---|---|---|
| १) मेघसन्देशः | सन्देशकाव्यम् | कालिदासः । |
| २) कादम्बरी | गद्यकाव्यम् | बाणभट्टः । |
| ३) रामायणं चम्पूः | चम्पूकाव्यम् | भोजराजः । |

9. **काव्यलिङ्गालङ्कारस्य लक्षणम् उदाहरण-समन्वयसूर्वकं लिखत ।** (1x 4=4)

उचितलक्षणसमर्थनस्य कृते अङ्कद्वयम् ।

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम्।

10. **अधोदत्तं गद्यांशं पठित्वा सम्भाषणं पूरयत।** (4x 1=4)

उचितस्य एकैकस्य संम्भाषणपूरणस्य कृते एकैकोऽङ्कः ।

11. **प्रादेशिकभाषया विवर्तयत ।** (1x 5=5)

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।

*** *** ***

SET -II

## S. S. L .C. EXAMINATION , MARCH - 2017
## SAMPLE QUESTION PAPER - BLUE PRINT
## SANSKRIT
## First Language Part I Sanskrit- Paper -II
### (For Oriental Sanskrit Schools )

### BLUE PRINT
### प्रश्नविशकलनरूपरेखा

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | विचित्रम् | 1 | 4 | 3 | 10 | 4 | 14 |
| २ | चित्रम् | | | 3 | 12 | 3 | 12 |
| ३ | शास्त्रम् | 1 | 4 | 3 | 10 | 4 | 14 |
| | **आहत्य** | **2** | **8** | **9** | **32** | **11** | **40** |

**WEIGHTAGE TO TYPE OF QUESTIONS**

**प्रश्नानाम् आपेक्षिकप्राधान्यम् ।**

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | अङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 9 | 32 | 80% |
| | **आहत्य** | **11** | **40** | **100%** |

**WEIGHTAGE TO UNITS**

**एककानाम् आपेक्षिकप्राधान्यम् ।**

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| १ | विचित्रम् | 14 | 35.0% |
| २ | चित्रम् | 12 | 30.0% |
| ३ | शास्त्रम् | 14 | 35.0% |
| **आहत्य** | | **40** | **100%** |

# First Terminal Evaluation -2016
## First Language Paper-I SANSKRIT-Part-II
## पादवार्षिकमूल्यनिर्णयः २०१६
## संस्कृतम्-Part-II
## (संस्कृतविद्यालयानां कृते)
**(For Oriental Sanskrit Schools Only)**

**STD - X** **Score : 40**

**कक्ष्या - दशमी** **Time : 1½ Hours**

---

## निर्देशाः

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् उत्तराणि च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

---

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** (4x1=4)

१. सौन्दर्यमलङ्कारः इति केन उक्तम् ?
(वामनेन, दण्डिना, भामहेन)

२. सन्मार्गदायकम् एवम् उपदेशात्मकं च भवति——।
(काव्यम्, शास्त्रम्, व्याकरणम्)

३. साधु असाधु शब्दज्ञानाय उपकारकं भवति———।
(न्यायशास्त्रं, वेदान्तशास्त्रं, व्याकरणशास्त्रम्)

४. कारकाणि कति ?
(षट्, सप्त, अष्ट)

**2. लक्षणसमन्वयपूर्वकम् अलङ्कारं निर्णयत।** (4)

**हनूमानब्धिमतरत् दुष्करं किं महात्मनाम्।**

**3. गणनिर्णयं कृत्वा लक्षणसमन्वयपूर्वकं वृत्तनिर्णयं कुरुत।** (4)

शिवश्शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति।।

**4. कालिदासस्य प्रकृतिवर्णनामधिकृत्य लघूपन्यासं रचयत।** (5)

(सुचनाः - मेघवर्णनानन्तरं- भूमेः परिणामं- कदम्बवृक्षः - केसरैः -हरितकपिशं अनुकच्छं- भूकन्दली- प्रथममुकुलैः- शोभन्ते- वनप्रदेशः- मृद्गन्धेन- हृदयहारिणः- मृगाः- गजाः- तानास्वाद्य गच्छति।)

**5. अधोदत्तं सूत्रद्वयं सोदाहरणं विशदयत।** (2x4=8)

१. **कालाध्वनोरत्यन्तसंयोगे।**

२. **कर्मणि द्वितीया।**

**6. यथोचितं योजयत।** (4x1=4)

| | |
|---|---|
| १. कर्मसंज्ञा | अलङ्कारः । |
| २. इन्द्रवज्रा | कालिदासः । |
| ३. अर्थान्तरन्यासः | कर्तुरीप्सिततमं कर्म । |
| ४. कविकुलगुरुः | सप्त । |
| | वृत्तम् । |

**7. दत्तयोः वाक्ययोः रेखाङ्कितपदस्य विभक्तिः का?, तत्र प्रयुक्तं सूत्रम् किम् इति च लिखत।** (2)

१. मार्जारः **दन्तेन** मूषकं हरति।

२. बालकः **विद्यालयं** गच्छति।

**8. प्रादेशिकभाषया विवर्तयत।** (5)

भारतस्य उत्तरभागे रक्षकः इव तिष्ठति हिमालयपर्वतः। हिमालयः सर्वदा अपि हिमैः आच्छन्नः भवति। अत एव एतस्य पर्वतस्य अन्वर्थनाम हिमालयः इति। लोके अत्युन्नतः पर्वतः हिमालयः एव। हिमालयाद् गंगा, यमुना, सिन्धुः, ब्रह्मपुत्रा इत्यादयः नद्यः प्रवहन्ति।

**9. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (4x1=4)

नारायणभट्टः इति सुविख्यातः नानाशास्त्रपण्डितः महान् वैयाकरणः परमभक्तः कविश्च आसीत्। सः मलप्पुरं जनपदस्य मेल्पुत्तूर्गृहे जनिम् अलभत। मातृदत्त इति पितुर्नाम। मातृगृहं तृश्शूर् जनपदस्य पट्यूर् ग्रामे। वेदाध्ययनेन सह संस्कृतभाषामपि अपठत्। अच्युतपिषारोडिः तं व्याकरणमपाठयत्।

१. नारायणभट्टपादः कः आसीत् ?

२. सः कुत्रः जनिमलभत ?

३. तस्य पितुः नाम किम् ?

४. मातृगृहं कुत्रासीत् ?

◆◆◆

# First Terminal Evaluation -2016
## First Language Paper- I-SANSKRIT-Part-II
## (For Oriental Sanskrit Schools Only)

**STD - X** **Score : 40**

## Answer Key

| प्रश्नसंख्या | मूल्यनिर्णयसूचकाः | अङ्कविशदांशः | आहत्य |
|---|---|---|---|
| 1. | समुचितमुत्तरं निर्धार्यते चेत् एकैकोऽङ्कः।<br>दण्डिना, काव्यम्, व्याकरणशास्त्रम्, षट्। | 4x1 | 4 |
| 2. | लक्षणसमन्वयायउदाहरणसमर्थनाय। | 2-2 | 4 |
| 3. | गणनिर्णयायसमन्वयाय। | 2-2 | 4 |
| 4. | आशयग्रहणायसूचनायाः<br>सदुपयोगायभाषाप्रयोगाय। | 2-2-1 | 5 |
| 5. | सूत्रव्याख्यानाय उदाहरणलेखनाय। | 4x2 | 8 |
| 6. | यथोचितं योजयति चेत् एकैकोऽङ्कः।<br>कर्तुरीप्सिततमं कर्म, वृत्तम्, अलङ्कारः,<br>कालिदासः। | 4x1 | 4 |
| 7. | विभक्तिज्ञानायसूत्रलेखनाय। | 1-1 | 2 |
| 8. | एकैकस्य वाक्यस्य एकैकोऽङ्कः। | 5x1 | 5 |
| 9. | प्रश्नस्य उत्तरलेखनाय एकैकोऽङ्कः। | 4x1 | 4 |
| | | | **40** |

# Second Terminal Evaluation-2016

## First Language Part II - Paper -II

## SANSKRIT

**( Oriental Sanskrit Schools Only )**

**Class -X**

**Time - 1½ Hours** **Total Score - 40**

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

क) ‘ कादम्बरी ’ केन विरचितं भवति ?

(कालिदासेन , भारविणा, बाणभट्टेन)

ख) वैयाकरणसिद्धान्तकौमुदी केन विरचिता भवति ?

(पाणिनिना , भट्टोजिदीक्षितेन , पतञ्जलिना)

ग) क्रियासिद्धौ प्रकृष्ठोपकारकं कारकं किम् ?

( हेतौ, स्वतन्त्रः कर्ता, साधकतमं करणम्)

घ) उज्जयिन्याः राजपुत्रः कः ?

( चन्द्रापीडः , तारापीडः, हंसः)

**2. यथोचितं योजयत।** **(4x1=4)**

| | | |
|---|---|---|
| क) | महाश्वेतावृत्तान्तः - | तृतीया। |
| ख) | सूर्याः - | कादम्बरी। |
| ग) | हेत्वर्थे - | सप्त। |
| घ) | अश्वाः - | द्वादश । |

**3. गणनिर्णयपूर्वकम् अधोदत्तवृत्तस्य लक्षणम् उदाहरणं च लिखत।** (1x4=4)

क) शार्दूलविक्रीडितम् ।

**4. अधोरेखाङ्कितपदस्य सन्धिच्छेदं लिखत।** (2x1=2)

क) भूयः **स भूतेश्वरपार्श्ववर्ती** ।

**किञ्चिद्विहस्यार्थपतिं** बभाषे ।।

**5. अधोनिर्दिष्टयोः सूत्रद्वयं सोदाहरणं व्याख्यात।** (2x4=8)

१) कर्तृकरणयोः तृतीया ।

२) येनाङ्गविकारः ।

३) रुच्यर्थानां प्रीयमाणः ।

**6. अधोदत्तस्य श्लोकस्य आशयं लिखत ।** (1x4=4)

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा प्रदीयते ।।

**7. सूचनानुसारं महाश्वेतायाः जन्मवृत्तान्तकथां स्ववाक्यैः लिखत।** (4x1=4)

**सूचनाः** - उज्जयिन्याः युवराजः - एवं वदति - यौवनारंभे - पुण्डरीकनामकं मुनिकुमारं - चन्द्रमण्डलमुदगात् ।

**8 . लक्ष्यलक्षणसमन्वयपूर्वकं दृष्टान्तालङ्कारं लिखत।** (1x4=4)

**9 प्रादेशिकभाषया लिखत।** (1x4=4)

नाटके चतुर्विधः अभिनयः भवति- सात्विकः, आङ्गिकः, वाचिकः आहार्यश्चेति। नाटकाभिनयः बालकानां मानसिकविकासाय महत्वपूर्णा साधना भवति । नाटककथाद्वारा विभिन्नानां पात्राणां स्वभावाः व्यवहाराश्च बालकैः ज्ञातुं शक्यन्ते। उत्तमनाटकस्थानाम् आदर्शपात्राणाम् अनुकरणेन बालकाः सच्चरितं परिचयं सम्पादयन्ति।

**10. उदाहरणानुसारं ‘ यदा-तदा ’ उपयुज्य वाक्यं परिवर्त्य लिखत।** (1x2=2)

***उदा-*** वर्षा आगच्छति । छत्रम् उद्‌घाटयति ।

यदा वर्षा आगच्छति तदा छत्रम् उद्‌घाटयति।

क) लोकयानम् आगच्छति । यात्रिकाः अन्तः प्रविशन्ति।

# Second Terminal Evaluation-2016

First Language Part II - Paper -II

**SANSKRIT** - ANSWER KEY

**( Oriental Sanskrit Schools Only )**

**Class -X** **Total Score - 40**

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **(4x1=4)**

क) बाणभट्टेन। ख) भट्टोजिदीक्षितः ।

ग) साधकतमं करणम् । घ) चन्द्रापीडः ।

**2. यथोचितं योजयत।** **(4x1=4)**

क) महाश्वेतावृत्तान्तः - कादम्बरी।

ख) सूर्याः - द्वादश ।

ग) हेत्वर्थे - तृतीया।

घ) अश्वाः - सप्त।

**3. गणनिर्णयपूर्वकम् अधोदत्तवृत्तस्य लक्षणम् उदाहरणं च लिखत।** **(1x4=4)**

उचितस्य गणनिर्णयस्य कृते अङ्कद्वयम्।

उचितस्य वृत्तलक्षणस्य कृते अङ्कद्वयम् ।

**4. अधोरेखाङ्कितपदस्य सन्धिच्छेदं लिखत।** **(2x1=2)**

क) स + **भूतेश्वरपाश्ववर्ती** ।

**किञ्चित्** + **विहस्य** + **अर्थपतिं**

**5. अधोनिर्दिष्टयोः सूत्रद्वयं सोदाहरणं व्याख्यात।** **(2x4=8)**

उचित लक्षणसमर्थनस्य कृते अङ्कद्वयम् ।

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम् ।

**6. अधोदत्तस्य श्लोकस्य आशयं लिखत ।** **(1x4=4)**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा प्रदीयते ।।

**7. सूचनानुसारं महाश्वेतायाः उत्पत्तिकथां स्ववाक्यैः लिखतु।** **(4x1=4)**

समुचितस्य उत्तरस्य कृते समीचीनाङ्कः ।

**मूल्यनिर्णयसूचकाः**

- सूचनानुसारम् आशयस्वीकरणस्य कृते अङ्कद्वयम् ।
- वाक्यस्य पूर्णतयै एकोऽङ्कः ।
- भाषाशुद्धै एकोऽङ्कः

**8 . लक्ष्यलक्षणसमन्वयपूर्वकं दृष्टान्तालङ्कारं लिखत।** **(1x4=4)**

उचित लक्षणसमर्थनस्य कृते अङ्कद्वयम्

उचित उदाहरणसमर्थनस्य कृते अङ्कद्वयम् ।

**9 प्रादेशिकभाषया लिखत।** **(1x4=4)**

उचितस्य एकैकस्य वाक्यस्य अनूदनाय एकैकोऽङ्कः ।।

**10. उदाहरणानुसारं ‘ यदा - तदा ’ उपयुज्य वाक्यं परिवर्त्य लिखत।** **(1x2=2)**

क) यदा लोकयानम् आगच्छति तदा यात्रिकाः अन्तः प्रविशन्ति।

# Second Terminal Evaluation-2016

First Language Part II - Paper -II

**SANSKRIT**

**( Oriental Sanskrit Schools Only )**

**Class -X** Total Score - 40

## BLUE PRINT

## प्रश्नविशकलनरूपरेखा

| क्रमसंख्या | एककम् | वस्तुनिष्ठम् | | विवरणम् | | आहत्य | |
|---|---|---|---|---|---|---|---|
| | | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः | प्रश्नसंख्या | अङ्काः |
| १ | विचित्रम् | 1 | 3 | 5 | 16 | 6 | 19 |
| २ | चित्रम् | 1 | 2 | 2 | 8 | 3 | 10 |
| ३ | शास्त्रम् | - | 3 | 1 | 8 | 1 | 11 |
| | **आहत्य** | **2** | **8** | **8** | **32** | **10** | **40** |

## WEIGHTAGE TO TYPE OF QUESTIONS

## प्रश्नानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | प्रश्नरूपाणि | प्रश्नसंख्या | अङ्काः | प्रतिशतम् |
|---|---|---|---|---|
| १ | वस्तुनिष्ठम् | 2 | 8 | 20 % |
| २ | विवरणम् | 9 | 32 | 80% |
| | **आहत्य** | **11** | **40** | **100%** |

## WEIGHTAGE TO UNITS

## एककानाम् आपेक्षिकप्राधान्यम् ।

| क्रमसंख्या | एककम् | अङ्काः | प्रतिशतम् |
|---|---|---|---|
| १ | विचित्रम् | 19 | 47.5% |
| २ | चित्रम् | 10 | 25% |
| ३ | शास्त्रम् | 11 | 27.5% |
| **आहत्य** | | **40** | **100%** |